# Natya Shastra Chapter 8

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૮

## Document Information


Text title : naaTyashaastra adhyaaya 8

File name : natya08.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : August 22, 2020

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# Natya Shastra Chapter 8

## નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૮

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અષ્ટમોઽધ્યાયઃ

ઋષયઃ ઊચુઃ ।
ભાવાનાં ચ રસાં ચ સમુત્થાનં યથાક્રમમ્ ।
ત્વત્પ્રસાદાચ્છ્રુતં સર્વમિચ્છામો વેદિતું પુનઃ ॥૧॥

નાટ્યે કતિવિધઃ કાર્યઃ તજ્જ્ઞૈરભિનયક્રમઃ ।
કતં વાભિનયો હ્યેષ કતિભેદસ્તુ કીર્તિતઃ ॥ ૨॥

સર્વમેતદ્યથાતત્ત્વં કથયસ્વ મહામુને ।
યો યથાભિનયો યસ્મિન્ યોક્તવ્યઃ સિદ્ધિમિચ્છતા ॥ ૩॥

તેષાં તુ વચનં શ્રુત્વા મુનીનાં ભરતો મુનિઃ ।
પ્રત્યુવાચ પુનર્વાક્યં ચતુરોઽભિનયાન્ પ્રતિ ॥ ૪॥

અહં વઃ કથયિષ્યામિ નિખિલેન તપોધનાઃ ।
યસ્માદભિનયો હ્યેષ વિધિવત્ સમુદાહૃતમ્ ॥ ૫॥

યદુક્તં ચત્વારોઽભિનય ઇતિ તાન્ વર્ણયિષ્યામઃ । અત્રાહ – અભિનય ઇતિ કસ્માત્ । અત્રોચ્યતે – અભીત્યુપસર્ગઃ ણીઞ્ ઇતિ પ્રાપણાર્થકો ધાતુઃ । અસ્યાભિનીત્યેવં વ્યવસ્થિતસ્ય એરજિત્યચ્પ્રત્યત્યયાન્તસ્યાભિનય ઇત્યેવં રૂપં સિદ્ધમ્ । એતચ્ચ ધાત્વર્થાનુવચનેનાવધાર્યં ભવતિ ।
અત્ર શ્લોકૌ –
અભિપૂર્વસ્તુ ણીઞ્ ધાતુરાભિમુખ્યાર્થનિર્ણયે ।
યસ્માત્પદાર્થાન્નયતિ તસ્માદભિનયઃ સ્મૃતઃ ॥ ૬॥

વિભાવયતિ યસ્માચ્ચ નાનાર્થાન્ હિ પ્રયોગતઃ ।
શાખાઙ્ગોપાઙ્ગસંયુક્તસ્તસ્માદભિનયઃ સ્મૃતઃ ॥ ૭॥

ચતુર્વિધશ્ચૈવ ભવેન્નાટ્યસ્યાભિનયો દ્વિજાઃ ।
અનેકભેદવાહ્યં નાટ્યં હ્યસ્મિન્ પ્રતિષ્ઠિતમ્ ॥ ૮॥

આઙ્ગિકો વાચિકશ્ચૈવ હ્યાહાર્યઃ સાત્ત્વિકસ્તથા ।
જ્ઞેયસ્ત્વભિનયો વિપ્રાઃ ચતુર્ધા પરિકલ્પિતઃ ॥ ૯॥

સાત્ત્વિકઃ પૂર્વમુક્તસ્તુ ભાવૈશ્ચ સહિતો મયા ।
અઙ્ગાભિનયમેવાદૌ ગદતો મે નિબોધત ॥ ૧૦॥

ત્રિવિધસ્ત્વાઙ્ગિકો દ્જ્ઞેયઃ શારીરો મુખજસ્તથા ।
તથા ચેષ્ટાકૃતશ્ચૈવ શાખાઙ્ગોપાઙ્ગસંયુતઃ ॥ ૧૧॥

શિરોહસ્તકટીદક્ષઃ પાર્શ્વપાદસમન્વિતઃ ।
અઙ્ગપ્રત્યઙ્ગસંયુક્તઃ ષડઙ્ગો નાટ્યસંગ્રહઃ ॥ ૧૨॥

તસ્ય શિરોહસ્તોરઃપાર્શ્વકટીપાદતઃ ષડઙ્ગાનિ ।
નેત્રભ્રૂનાસાધરકપોલચિબુકાન્યુપાઙ્ગાનિ ॥ ૧૩॥

અસ્ય શાખા ચ નૃત્તં ચ તથૈવાઙ્કુર એવ ચ ।
વસ્તૂન્યભિનયસ્યેહ વિજ્ઞેયાનિ પ્રયોક્તૃભિઃ ॥ ૧૪॥

આઙ્ગિકસ્તુ ભવેચ્છાખા હ્યઙ્કુરઃ સૂચના ભવેત્ ।
અઙ્ગહારવિનિષ્પન્નં નૃત્તં તુ કરણાશ્રયમ્ ॥ ૧૫॥

મુખજેઽભિનયે વિપ્રા!  નાનાભાવરસાશ્રયે ।
શિરસઃ પ્રથમં કર્મ ગદતો મે નિબોધત  ॥ ૧૬॥

આકમ્પિતં કમ્પિતં ચ ધૂતં વિધુતમેવ ચ ।
પરિવાહિતમાધૂતમવધૂતં તથાઞ્ચિતમ્ ॥ ૧૭॥

નિહઞ્ચિતં પરાવૃત્તમુત્ક્ષિપ્તં ચાપ્યધોગતમ્ ।
લોલિતં ચૈવ વિજ્ઞેયં ત્રયોદશવિધં શિરઃ ॥ ૧૮॥

શનૈરાકમ્પનાદૂર્ધ્વમધશ્ચાકમ્પિતં ભવેત્ ।
દ્રુતં તદેવ બહુશઃ કમ્પિતં કમ્પિતં શિરઃ ॥ ૧૯॥

ઋજુસ્થિતસ્ય ચોર્ધ્વાધઃ ક્ષેપાદાકમ્પિતં ભવેત્ ।
બહુશશ્ચલિતં યચ્ચ તત્કમ્પિતમિહોચ્યતે ॥ ૨૦॥

સંજ્ઞોપદેશપૃચ્છાસુ સ્વભાવાભાષણે તથા ।
નિર્દેશાવાહને ચૈવ ભવેદાકમ્પિતં શિરઃ ॥ ૨૧॥

રોષે વિતર્કે વિજ્ઞાને પ્રતિજ્ઞાનેऽથ તર્જને ।
પ્રશ્નાતિશયવાક્યેષુ શિરઃ કમ્પિતમિષ્યતે ॥ ૨૨॥

શિરસો રેચનં યત્તુ શનૈસ્તદ્ ધુતમિષ્યતે ।
દ્રુતમારેચનાદેતદ્વિધુતં તુ ભવેચ્છિરઃ ॥ ૨૩॥

અનીપ્સિતે વિષાદે ચ વિસ્મયે પ્રત્યયં તથા ।
પાર્શ્વાવલોકને શૂન્યે પ્રતિષેધે ધુતં શિરઃ ॥ ૨૪॥

શીતગ્રસ્તે ભયાર્તે ચ ત્રાસિતે જ્વરિતે તથા ।
પીતમાત્રે તથા મદ્યે વિધુતં તુ ભવેચ્છિરઃ ॥ ૨૫॥

પર્યાયશઃ પાર્શ્વગતં શિરઃ સ્યાત્ પરિવાહિતમ્ ।
આધૂતમુચ્યતે તિર્યક્ સકૃદુદ્વાહિતં તુ યત્ ॥ ૨૬॥

સાધને વિસ્મયે હર્ષે સ્મિતે ચામર્ષિતે તથા ।
વિચારે વિહૃતે ચૈવ લીલાયાં પરિવાહિતમ્ ॥ ૨૭॥

ગર્વેચ્છાદર્શને ચૈવ પાર્શ્વસ્થોર્ધ્વનિરીક્ષણે
આધુતં તુ શિરો જ્ઞેયમાત્મસમ્ભાવનાદિષુ ॥ ૨૮॥

યદધઃ સકૃદાક્ષિપ્તમવધૂતં તુ તચ્છિરઃ ।
સન્દેશાવાહનાલાપસંજ્ઞાદિષુ નદિષ્યતે ॥ ૨૯॥

કિઞ્ચિત્ પાર્શ્વનતગ્રીવં શિરો વિજ્ઞેયમઞ્ચિતમ્ ।
વ્યાધિતે મૂર્છિતે મત્તે ચિન્તાયાં હનુધારણમ્ ॥ ૩૦॥

ઉત્ક્ષિપાંસાવસક્તં યત્કુઞ્ચિતભ્રૂલતં શિરઃ ।
નિહઞ્ચિતં તુ વિજ્ઞેયં સ્ત્રીણામેતત્ પ્રયોજયેત્ ॥ ૩૧॥

ગર્વે માને વિલાસે ચ બિવ્વોકે કિલકિઞ્ચિતે ।
મોટ્ટાયિતે કુટ્ટમિતે સ્તમ્ભમાને નિહઞ્ચિતમ્ ॥ ૩૨॥

પરાવૃત્તાનુકરણાત્ પરાવૃત્તમિહોચ્યતે ।
તત્ સ્યાન્મુખાપહરણે પૃષ્ઠતઃ પ્રેક્ષણાદિષુ ॥ ૩૩॥

ઉત્ક્ષિપ્તં ચાપિ વિજ્ઞેયમુન્મુખાવસ્થિતં શિરઃ ।
પ્રાંશુદિવ્યાસ્ત્રયોગેષુ સ્યાદુત્ક્ષિપ્તં પ્રયોગતઃ ॥ ૩૪॥

અધોમુખં સ્થિતં ચાપિ બુધાઃ પ્રાહુરધોગતમ્ ।

લજ્જાયાં ચ પ્રણામે ચ દુઃખે ચાધોગતં શિરઃ ॥ ૩૫॥

સર્વતો ભ્રમણાચ્ચૈવ શિરઃ સ્યાત્ પરિલોલિતમ્ ।
મૂર્ચ્છાવ્યાધિમદાવેશગ્રહનિદ્રાદિષુ સ્મૃતમ્ ॥ ૩૬॥

ઋજુસ્વભાવસંસ્થાનં પ્રાકૃતં તુ સ્વભાવજમ્ ।
મંગલ્યાધ્યયનધ્યાનસ્વભાવજયકર્મસુ ॥ ૩૭॥

એભ્યોઽન્યે બહવો ભેદા લોકાભિનયસંશ્રિતાઃ ।
તે ચ લોકસ્વભાવેન પ્રયોક્તવ્યા પ્રયોક્તૃભિઃ ॥ ૩૮॥

ત્રયોદશવિધં હ્યેતચ્છિરઃકર્મ મયોદિતમ્ ।
અતઃ પરં પ્રવક્ષ્યામિ દૃષ્ટીનામિહ લક્ષણમ્ ॥ ૩૯॥

કાન્તા ભયાનકા હાસ્યા કરુણા ચાદ્ભુતા તથા ।
રૌદ્રો વીરા ચ બીભત્સા વિજ્ઞેયા રસદૃષ્ટયઃ ॥ ૪૦॥

સ્નિગ્ધા હૃષ્ટા ચ દીના ચ ક્રુદ્ધા દૃપ્તા ભયાન્વિતા ।
જુગુપ્સિતા વિસ્મિતા ચ સ્થાયિભાવેષુ દૃષ્ટયઃ ॥ ૪૧॥

શૂન્યા ચ મલિના ચૈવ શ્રાન્તા લજ્જાન્વિતા તથા ।
ગ્લાના ચ શઙ્કિતા ચૈવ વિષણ્ણા મુકુલા તથા ॥ ૪૨॥

કુઞ્ચિતા ચાભિતપ્તા ચ જિહ્મા સલલિતા તથા ।
વિતર્કિતાર્ધમુકુલા વિભ્રાન્તા વિલુપ્તા તથા ॥ ૪૩॥

આકેકરા વિકોશા ચ ત્રસ્તા ચ મદિરા તથા ।
ષટ્ત્રિંશદ્ દૃષ્ટયો હ્યેતા તાસુ નાટ્યં પ્રતિષ્ઠિતમ્ ॥ ૪૪॥

અસ્ય દૃષ્ટિવિધાનસ્ય નાનાભાવરસાશ્રયમ્ ।
લક્ષણં સમ્પ્રવક્ષ્યમિ યથાકર્મ પ્રયોગતઃ ॥ ૪૫॥

હર્ષપ્રસાદજનિતા કાન્તાત્યર્થં સમન્યથા ।
સભ્રૂક્ષેપકટાક્ષા ચ શૃઙ્ગારે દૃષ્ટિરિક્ષ્યતે ॥ ૪૬॥

પ્રોદ્વૃત્તનિષ્ટબ્ધપુટા સ્ફુરદુદ્વૃત્તતારકા ।
દૃષ્ટિર્ભયાનાકાત્યર્થં ભીતા જ્ઞેયા ભયાનકે ॥ ૪૭॥

ક્રમાદાકુઞ્ચિતપુટા વિભ્રાન્તાકુલતારકા ।
હાસ્યા દૃષ્ટિસ્તુ કર્તવ્યા કુહકાભિનયં પ્રતિ ॥ ૪૮॥

પતિતોર્ધ્વપુટા સાસ્રા મન્યુમન્થરતારકા ।
નાસાગ્રાનુગતા દૃષ્ટિઃ કરુણા કરુણે રસે ॥ ૪૯॥

યા ત્વાકુઞ્ચિતપક્ષ્માગ્રા સાશ્ચર્યોદ્વૃત્તતારકા ।
સૌમ્યા વિકસિતાન્તા ચ સાદ્ભુતા દૃષ્ટિરદ્ભુતે॥ ૫૦
ક્રૂરા રૂક્ષારુણોદ્વૃતનિષ્ટબ્ધપુટતારકા ।
ભ્રુકુટીકુટિલા દૃષ્ટિઃ રૌદ્રે રૌદ્રી રસા સ્મૃતા ॥ ૫૧॥

દીપ્તા વિકસિતા ક્ષુબ્ધા ગમ્ભીરા સમતારકા ।
ઉત્ફુલ્લમધ્યા દૃષ્ટિસ્તુ વીરા વીરરસાશ્રયા ॥ ૫૨॥

નિકુઞ્ચિતપુટાપાઙ્ગા ઘૂર્ણોપપ્લુતતારકા ।
સંશ્લિષ્ટસ્થિરપક્ષ્મા ચ બીભત્સા દૃષ્ટિરિષ્યતે ॥ ૫૩॥

નાસાગ્રસક્તા નિમિષા તથાધોભાગચારિણી ।
આકેકરપુટા શાન્તે શાન્તા દૃષ્ટિર્ભવેદસૌ ॥ ૫૪॥

રસજા દૃષ્ટયો હ્યેતા વિજ્ઞેયા લક્ષણાન્વિતા ।
અતઃ પરં પ્રવક્ષ્યામિ સ્થાયિભાવસમાશ્રયાઃ ॥ ૫૫॥

વ્યાકોશમધ્યા મધુરા સ્થિતતારાભિલાષિણી ।
સાનન્દાશ્રુપ્લુતા દૃષ્ટિઃ સ્નિગ્ધેયં રતિભાવજા ॥ ૫૬॥

ચલા હસિતગર્ભા ચ વિશત્તારાનિમેષિણી ।
કિઞ્ચિદાકુઞ્ચિતા દૃષ્ટિઃ હૃષ્ટા હાસે પ્રકીર્તિતા ॥ ૫૭॥

અવસ્રસ્તોત્તરપુટા કિઞ્ચિત્સરંબ્ધતારકા ।
મન્દસઞ્ચારિણી દીના સા શોકે દૃષ્ટિરિષ્યતે ॥ ૫૮॥

રૂક્ષા સ્થિરોદ્વૃતપુટા નિષ્ટબ્ધોદ્વૃત્તતારકા ।
કુટિલા ભ્રુકુટિર્દૃષ્ટિઃ ક્રુદ્ધા ક્રોધે વિધીયતે ॥ ૫૯॥

સંસ્થિતે તાર્કે યસ્યાઃ સ્થિતા વિકસિતા તથા ।
સત્ત્વમુદ્ગિરતી દૃપ્તા દૃષ્ટિરુત્સાહસંભવા ॥ ૬૦॥

વિસ્ફારિતોભયપુટા ભયકમ્પિતતારકા ।
નિષ્ક્રાન્તમધ્યા દૃષ્ટિસ્તુ ભયભાવે ભયાન્વિતા ॥ ૬૧॥

સંકોચિતપુટાધ્યામા દૃષ્ટિર્મીલિતતારકા ।
પક્ષ્મોદ્દેશાત્ સમુદ્વિગ્ના જુગુપ્સાયાં જુગુપ્સિતા ॥ ૬૨॥

ભૃશમુદ્વૃત્તતારા ચ નષ્ટોભયપુટાન્વિતા ।
સમા વિકસિતા દૃષ્ટિર્વિસ્મિતા વિસ્મયે સ્મૃતા ॥ ૬૩॥

સ્થાયિભાવાશ્રયા હ્યેતા વિજ્ઞેયાઃ દૃષ્ટયો બુધૈઃ ।
સંચારિણીનાં દૃષ્ટીનાં સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ॥ ૬૪॥

સમતારા સમપુટા નિષ્કમ્પા શૂન્યદર્શના ।
બાહ્યાર્થાગ્રાહિણી ધ્યામા શૂન્યા દૃષ્ટિઃ પ્રકીર્તિતા ॥ ૬૫॥

પ્રસ્પન્દમાનપક્ષ્માગ્રા નાત્યર્થમુકુલૈઃ પુટૈઃ ।
મલિનાન્તા ચ મલિના દૃષ્ટિર્વિસ્મિતતારકા ॥ ૬૬॥

શ્રમપ્રમ્લાપિતપુટા ક્ષામા કુઞ્ચિતલોચના ।
સન્ના પતિતતારા ચ શ્રાન્તા દૃષ્ટિઃ પ્રકીર્તિતા ॥ ૬૭॥

કિઞ્ચિદઞ્ચિતપક્ષ્માગ્રા પતિતોર્ધ્વપુટા હ્રિયા ।
ત્રપાધોગતતારા ચ દૃષ્ટિર્લજ્જાન્વિતા તુ સા ॥ ૬૮॥

મ્લાનભ્રુપુટપક્ષ્મા યા શિથિલા મન્દચારિણી ।
ક્રમપ્રવૃષ્ટતારા ચ ગ્લાના દૃષ્ટિસ્તુ સા સ્મૃતા ॥ ૬૯॥

કિઞ્ચિચ્ચલા સ્થિરા કિઞ્ચિદુદ્ગતા તિર્યગાયતા ।
ગૂઢા ચકિતતારા ચ શઙ્કિતા દૃષ્ટિરિષ્યતે ॥ ૭૦॥

વિષાદવિસ્તીર્ણપુટા પર્યસ્તાન્તા નિમેષિણી ।
કિઞ્ચિન્નિષ્ટબ્ધતારા ચ કાર્યા દૃષ્ટીર્વિષાદિની ॥ ૭૧॥

સ્ફુરદાશ્લિષ્ટપક્ષ્માગ્રા મુકુલોર્ધ્વપુટાઞ્ચિતા ।
સુખોન્મીલિતતારા ચ મુકુલા દૃષ્ટિરિષ્યતે ॥ ૭૨॥

આનિકુઞ્ચિતપક્ષ્માગ્રા પુટૈરાકુઞ્ચિતૈસ્તથા ।
સંનિકુઞ્ચિતતારા ચ કુઞ્ચિતા દૃષ્ટિરિષ્યતે ॥ ૭૩॥

મન્દાયમાનતારા યા પુટૈઃ પ્રચલિતૈસ્તથા ।
સન્તાપોપપ્લુતા દૃષ્ટિરભિતપ્તા તુ સવ્યથા ॥ ૭૪॥

લમ્બિતાકુઞ્ચિતપુટા શનૈસ્તિર્યઙ્ નિરીક્ષિણી ।
નિગૂઢા ગૂઢતારા ચ જિહ્મા દૃષ્ટિરુદાહૃતા ॥ ૭૫॥

મધુરાકુઞ્ચિતાન્તા ચ સભ્રૂક્ષેપા ચ સસ્મિતા ।
સમમન્યવિકારા ચ દૃષ્ટિઃ સા લલિતા સ્મૃતા ॥ ૭૬॥

વિતર્કોદ્વર્તિતપુટા તથૈવોત્ફુલ્લતારકા ।
અધોગતવિચારા ચ દૃષ્ટિરેષા વિતર્કિતા ॥ ૭૭ ॥

અર્ધવ્યાકોશપક્ષ્મા ચ હ્લાદાર્ધમુકુલૈઃ પુટૈઃ ।
સ્મિતાર્શમુકુલા દૃષ્ટિઃ કિઞ્ચિલ્લુલિતતારકા ॥ ૭૮ ॥

અનવસ્થિતતારા ચ વિભ્રાન્તાકુલદર્શના ।
વિસ્તીર્ણોત્ફુલ્લમધ્યા ચ વિભ્રાન્તા દૃષ્ટિરુચ્યતે ॥ ૭૯ ॥

પુટૌ પ્રસ્ફુરિતૌ યસ્ય નિષ્ટબ્ધૌ પતિતૌ પુનઃ ।
વિલુપ્તોદ્વૃત્તતારા ચ દૃષ્ટિરેષા તુ વિપ્લુતા ॥ ૮૦ ॥

આકુઞ્ચિતપુટાપાઙ્ગા સઙ્ગતાર્ધનિમેષિણી ।
મુહુર્વ્યાવૃત્તતારા ચ દૃષ્ટિરાકેકરા સ્મૃતા ॥ ૮૧ ॥

વિકોશિતોભયપુટા પ્રોત્ફુલ્લા ચાનિમેષિણી ।
અનવસ્થિતસઞ્ચારા વિકોશા દૃષ્ટિરુચ્યતે ॥ ૮૨ ॥

ત્રાસોદ્વૃત્તપુટા યા તુ તથોત્કમ્પિતતારકા ।
સન્ત્રાસોત્ફુલ્લમધ્યા ચ ત્રસ્તા દૃષ્ટિરુદાહૃતા ॥ ૮૩ ॥

આઘુર્ણમાનમધ્યા યા ક્ષામાન્તાઞ્ચિતલોચના ।
દૃષ્ટિર્વિકસિતાપાઙ્ગા મદિરા તરુણે મદે ॥ ૮૪ ॥

કિઞ્ચિદાકુઽચિતપુટા હ્યનવસ્થિતતારકા ।
તથા ચલિતપક્ષ્મા ચ દૃષ્ટિર્મધ્યમદે ભવેત્ ॥ ૮૫ ॥

સનિમેષાનિમેષા ચ કિઞ્ચિદ્ દર્શિતતારકા ।
અધોભાગચરી દૃષ્ટિરધમે તુ મદે સ્મૃતા ॥ ૮૬ ॥

ઇત્યેવં લક્ષિતા હ્યેતા ષટત્રિંશદ્ દૃષ્ટયો મયા ।
રસજા સહજાશ્ચાસાં વિનિયોગં નિબોધત ॥ ૮૭ ॥

રસજાસ્સ્તુ રસેષ્વેવ સ્થાયિષુ સ્થાયિદૃષ્ટયઃ ।
શૃણુત વ્યભિચારિણ્યઃ સઞ્ચારિષુ યથાસ્થિતાઃ ॥ ૮૮ ॥

શૂન્યા દૃષ્ટિસ્તુ ચિન્તાયાં સ્તમ્ભે ચાપિ પ્રકીર્તિતા ।
નિર્વેદે ચાપિ મલિના વૈવર્ણ્યે ચ વિધીયતે ॥ ૮૯ ॥

શ્રાન્તા શ્રમાર્તે સ્વેદે ચ લજ્જાયાં લલિતા તથા ।

અપસ્મારે તથા વ્યાધૌ ગ્લાન્યાં ગ્લાના વિધીયતે ॥ ૯૦॥

શઙ્કાયાં શઙ્કિતા જ્ઞેયા વિષાદાર્થે વિષાદિની ।
નિદ્રાસ્વપ્નસુખાર્થેષુ મુકુલા દૃષ્ટિરિષ્યતે ॥ ૯૧॥

કુઞ્ચિતાસૂયિતાનિષ્ટદુષ્પ્રેક્ષાક્ષિવ્યથાષુ ચ ।
અભિતપ્તા ચ નિર્વેદે હ્યભિઘાતાભિતાપયોઃ ॥ ૯૨॥

જિહ્મા દૃષ્ટિરસૂયાયાં જડતાલસ્યયોસ્તથા ।
ધૃતૌ હર્ષે સલલિતા સ્મૃતૌ તર્કે ચ તર્કિતા ॥ ૯૩॥

આહ્લાદિષ્વર્ધમુકુલા ગન્ધસ્પર્શસુખાદિષુ ।
વિભ્રાન્તા દૃષ્ટિરાવેગે સમ્ભ્રમે વિભ્રમે તથા ॥ ૯૪॥

વિલુપ્તા ચપલોન્માદદુઃખાર્તિમરણાદિષુ ।
આકેકરા દુરાલોકે વિચ્છેદપ્રેઅક્ષિતેષુ ચ ॥ ૯૫॥

વિબોધગર્વામર્શૌગ્ર્યમતિષુ સ્યાદ્વિકોશિતા ।
ત્રસ્તા ત્રાસે ભવેદ્ દૃષ્ટિર્મદિરા ચ મદેષ્વિતિ ॥ ૯૬॥

ષટત્રિંશદ્ દૃષ્ટયો હ્યેતા યથાવત્ સમુદાહૃતાઃ ।
રસજાનાં તુ દૃષ્ટીનાં ભાવજાનાં તથૈઅવ ચ ॥ ૯૭॥

તારાપુટભ્રુવાં કર્મ ગદતો મે નિબોધત ।
ભ્રમણં વલનં પાતશ્ચલનં સમ્પ્રવેશનમ્ ॥ ૯૮॥

વિવર્તનં સમુદ્વૃત્તં નિષ્ક્રામઃ પ્રાકૃતં તથા ।
પુટાન્તર્મણ્ડલાવૃત્તિસ્તારયોર્ભ્રમણં સ્મૃતમ્ ॥ ૯૯॥

વલનં ગમનં ત્ર્યસ્રં પાતનં સ્રસ્તતા તથા ।
ચલનં કમ્પનં જ્ઞેયં પ્રવેશોઽન્તઃપ્રવેશનમ્ ॥ ૧૦૦॥

વિવર્તનં કટાક્ષસ્તુ  સમુદ્વૃત્તં સમુન્નતિઃ ।
નિષ્ક્રામો નિર્ગમઃ પ્રોક્તઃ પ્રાકૃતં તુ સ્વભાવજમ્ ॥ ૧૦૧॥

અથૈષાં રસભાવેષુ વિનિયોગં નિબોધત ।
ભ્રમણં ચલનોદ્વૃત્તે નિષ્ક્રામો વીરરૌદ્રયોઃ ॥ ૧૦૨॥

નિષ્ક્રામણં સંવલનં કર્તવ્યં તુ ભયાનકે ।
હાસ્યબીભત્સયોશ્ચાપિ પ્રવેશનમિહેષ્યતે ॥ ૧૦૩॥

પાતનં કરુણે કાર્યં નિષ્ક્રામણમથાદ્ભુતે ।
પ્રાકૃતં શેષભાવેષુ શ‍ૃઙ્ગારે ચ વિવર્તિતમ્ ॥ ૧૦૪॥

સ્વભાવસિદ્ધમેવૈતત્ કર્મ લોકક્રિયાશ્રયમ્ ।
એવં રસેષુ ભાવેષુ તારાકર્માણિ યોજયેત્ ॥ ૧૦૫॥

અથાઽત્રૈવ પ્રવક્ષ્યામિ પ્રકારન્ દર્શનસ્ય તુ ।
સમં સાચ્યનુવૃત્તે ચ હ્યાલોકિતવિલોકિતે ॥ ૧૦૬॥

પ્રલોકિતોલ્લોકિતે ચાપ્યવલોકિતમેવ ચ ।
સમતારં ચ સૌમ્યં ચ યદ્દૃષ્ટં તત્ સમં સ્મૃતમ્ ॥ ૧૦૭॥

પક્ષ્માન્તરગતતારં ચ ત્ર્યસ્રં સાચીકૃતં તુ તત્ ।
રૂપનિર્વર્ણના યુક્તમનુવૃત્તમિતિ સ્મૃતમ્ ॥ ૧૦૮॥

સહસા દર્શનં યત્ સ્યાત્તદાલોકિતમુચ્યતે ।
વિલોકિતં પૃષ્ટતસ્તુ પાર્શ્વાભ્યાં તુ પ્રલોકિતમ્ ॥ ૧૦૯॥

ઊર્ધ્વમુલ્લોકિતં જ્ઞેયમવલોકિતમપ્યધઃ ।
ઇત્યેષુ દર્શનવિધિઃ સર્વભાવરસાશ્રયઃ ॥ ૧૧૦॥

તારાકૃતોઽસ્યાનુગતં પુટકર્મ નિબોધત ।
ઉન્મેષશ્ચ નિમેષશ્ચ પ્રસૃતં કુઞ્ચિતં સમમ્ ॥ ૧૧૧॥

વિવર્તિતં સ સ્ફુરિતં પિહિતં સવિતાડિતમ્ ।
વિશ્લેષઃ પુટયોર્યસ્તુ સ તૂન્મેષઃ પ્રકીર્તિતઃ ॥ ૧૧૨॥

સમાગમો નિમેષઃ સ્યાદાયામઃ પ્રસૃતં ભવેત્ ।
આકુઽચિતં કુઞ્ચિતં સ્યાત્ સમં સ્વાભાવિકં સ્મૃતમ્ ॥ ૧૧૩॥

વિવર્તિતં સમુદ્વૃત્તં સ્ફુરિતં સ્પન્દિતં તથા ।
સ્થગિતં પિહિતં પ્રોક્તમાહતં તુ વિતાડિતમ્ ॥ ૧૧૪॥

અથૈષં રસભાવેષુ વિનિયોગં નિબોધત ।
ક્રોધે વિવર્તિતં કાર્યો નિમેષોન્મેષણૈઃ સહ ॥ ૧૧૫॥

વિસ્મયાર્થેષુ હર્ષે ચ વીરે ચ પ્રસૃતં સ્મૃતમ્ ।
અનિષ્ટદર્શને ગન્ધે રસે સ્પર્શે ચ કુઞ્ચિતમ્ ॥ ૧૧૬॥

શ‍ૃઙ્ગારે ચ સમં કાર્યમીર્ષ્યાસુ સ્ફુરિતં તથા ।
સુપ્તમૂર્ચ્છિતવાતોષ્ણધૂમવર્ષાઞ્જનાર્તિષુ ॥ ૧૧૭॥

નેત્રરોગે ચ પિહિતમભિઘાતે વિતાડિતમ્ ।
ઇત્યેવં રસભાવેષુ તારકાપુટયોર્વિધિઃ ॥ ૧૧૮॥

કાર્યાનુગતમસ્યૈવ ભ્રુવોઃ કર્મ નિબોધત ।
ઉત્ક્ષેપઃ પાતનશ્ચૈવ ભ્રુકુટી ચતુરં ભ્રુવોઃ ॥૧૧૯॥

કુઞ્ચિતં રેચિતં ચૈવ સહજં ચેતિ સપ્તધા ।
ભ્રુવોરુન્નતિરુત્ક્ષેપઃ સમમેકૈકશોઽપિ વા ॥૧૨૦॥

અનેનૈવ ક્રમેણૈવ પાતનં સ્યાદધોમુખમ્ ।
ભ્રુવોર્મૂલસમુત્ક્ષેપાત્ ભ્રુકુટી પરિકીર્તિતા ॥ ૧૨૧॥

ચતુરં કિઽચિદુચ્છ્વાસાન્મધુરાયતયા ભ્રુવોઃ ।
એકસ્યા ઉભયોર્વાપિ મૃદુભઙ્ગસ્તુ કુઞ્ચિતમ્ ॥ ૧૨૨॥

એકસ્યા એવ લલિતાદુત્ક્ષેપાદ્રેચિતં ભ્રુવઃ ।
સહજાતં તુ સહજં કર્મ સ્વાભાવિકં સ્મૃતમ્ ॥ ૧૨૩॥

અથૈષાં સમ્પ્રવક્ષ્યામિ રસભાવપ્રયોજનમ્ ।
કોપે વિતર્કે હેલાયાં લીલાદૌ સહજે તથા ॥ ૧૨૪॥

શ્રવણે દર્શને ચૈવ ભ્રુવમેકાં સમુત્ક્ષિપેત્ ।
ઉત્ક્ષેપો વિસ્મયે હર્ષે રોષે ચૈઅવ દ્વયોરપિ ॥ ૧૨૫॥

આસૂયિતજુગુપ્સાયાં હાસ્યે ઘ્રાણે ચ પાતનમ્ ।
ક્રોધસ્થાનેષુ દીપ્તેષુ યોજયેત્ ભ્રુકુટિં બુધઃ ॥ ૧૨૬॥

શ‍ૃઙ્ગારે લલિતે સૌમ્યે સુખે સ્પર્શે પ્રબોધને ।
એવં વિધેષુ ભાવેષુ ચતુરં તુ પ્રયોજયેત્ ॥ ૧૨૭॥

સ્ત્રીપુરુષયોશ્ચ સંલાપે નાનાવસ્થાન્તરાત્મકે ।
મોટ્ટાયિતે કુટ્ટમિતે વિલાસે કિલકિઞ્ચિતે ॥ ૧૨૮॥

નિકુઞ્ચિતં તુ કર્તવ્યં નૃત્તે યોજ્યં તુ રેચિતમ્ ।
અનાવિદ્ધેષુ ભાવેષુ વિદ્યાત્ સ્વાભાવિકં બુધઃ ॥૧૨૯॥

ઇત્યેવં તુ ભ્રુવઃ પ્રોક્તં નાસાકર્મ નિબોધત ।
નતા મન્દા વિકૃષ્ટા ચ સોચ્છ્વાસા ચ વિકૂણિતા ॥ ૧૩૦॥

સ્વાભાવિકા ચેતિ બુધૈઃ ષડ્વિધા નાસિકા સ્મૃતા ।

નતા મુહુઃશ્લિષ્ટપુટા મન્દા તુ નિભૃતા સ્મૃતા ॥ ૧૩૧॥

વિકૃષ્ટોત્ફુલ્લિતપુટા સોચ્છ્વાસા કૃષ્ટમારુતા ।
વિકૂણિતા સંકુચિતા સમા સ્વાભાવિકા સ્મૃતા ॥ ૧૩૨॥

નાસિકાલક્ષણં હ્યેતત્ વિનિયોગં નિબોધત ।
મદોત્કમ્પસમાયુક્તે નારીણામનુરોધને ॥ ૧૩૩॥

નિઃશ્વાસે ચ નતા કાર્યા નાસિકા નાટ્યયોક્તૃભિઃ ।
વિચ્છિન્નમન્દરુદિતે સોચ્છ્વાસે ચ નતા સ્મૃતા ॥ ૧૩૪॥

નિર્વેગૌત્સુક્યચિન્તાસુ મન્દા શોકે ચ યોજયેત્ ।
તીવ્રગન્ધે વિકૃષ્ટાં તૌ રૌદ્રે વીરે તથૈવ ચ ॥ ૧૩૫॥

ઇષ્ટઘ્રાણે તથોચ્છ્વાસે દીર્ઘોચ્છ્વાસાં પ્રયોજયેત્ ।
વિકૂણિતા ચ કર્તવ્યા જુગુપ્સાયામસૂયાદિષુ ॥ ૧૩૬॥

કાર્યા શેષુ ભાવેષુ તજ્ઞૈઃ સ્વાભાવિકા તથા ।
ક્ષામં ફુલ્લં ચ ઘૂર્ણં ચ કમ્પિતં કુઞ્ચિતં સમમ્ ॥ ૧૩૭॥

ષડ્વિધં ગણ્ડમુદ્દિષ્ટં તસ્ય લક્ષણમુચ્યતે ।
ક્ષામં ચાવનતં જ્ઞેયં ફુલ્લં વિકસિતં ભવેત્ ॥ ૧૩૮॥

વિતતં ઘૂર્ણમત્રોક્તં કમ્પિતં સ્ફુરિતં ભવેત્ ।
સ્યાત્ કુઞ્ચિતં સંકુઞ્ચિતં સમં પ્રાકૃતમુચ્યતે ॥ ૧૩૯॥

ગણ્ડયોર્લક્ષણં પ્રોક્તં વિનિયોગં નિબોધત ।
ક્ષામં દુઃખેષુ કર્તવ્યં પ્રહર્ષે ફુલ્લમેવ ચ ॥ ૧૪૦॥

પૂર્ણમુત્સાહગર્વેષુ રોમહર્ષેષુ કમ્પિતમ્ ।
કુઞ્ચિતં ચ સરોમાઞ્ચં સ્પર્શે શીતે ભયે જ્વરે॥ ૧૪૧॥

પ્રાકૃતં શેષભાવેષુ ગણ્ડકર્મ ભવેદિતિ ।
વિવર્તનં કમ્પનં ચ વિસર્ગો વિનિગૂહનમ્॥૧૪૨॥

સન્દષ્ટકં સમુદ્ગં ચ ષટ્ કર્માણ્યધરસ્ય તુ ।
વિકૂણિતં વિવર્તસ્તુ વેપનં કમ્પનં સ્મૃતમ્ ॥ ૧૪૩॥

વિનિષ્ક્રામો વિસર્ગસ્તુ પ્રવેશો વિનિગૂહનમ્ ।
સન્દષ્ટકં દ્વિજૈર્દષ્ટં સમુદ્ગઃ સહજોન્નતિ ॥ ૧૪૪॥

ઇત્યોષ્ઠલક્ષણં પ્રોક્તં વિનિયોગં નિબોધત ।
અસૂયાવેદનાવજ્ઞાભયાદિષુ વિવર્તનમ્ ॥ ૧૪૫ ॥

કમ્પનં વેપનં શીતભયરોષજવાદિષુ ।
સ્ત્રીઅણાં વિલાસે વિવ્વોકે વિસર્ગો રઞ્જને તથા ॥ ૧૪૬ ॥

વિનિગૂહનમાયાસે સન્દષ્ટં ક્રોધકર્મસુ ।
સમુદ્ગસ્ત્વનુકમ્પાયાં ચુમ્બને ચાભિનન્દને ॥ ૧૪૭ ॥

ઇત્યોષ્ઠકર્માણ્યુક્તાનિ ચિબુકસ્ય નિબોધત ।
કુટ્ટનં ખણ્ડનં છિન્નં ચુક્કિતં લેહનં સમમ્ ॥ ૧૪૮ ॥

દષ્ટં ચ દન્તક્રિયયા ચિબુકં ત્વિહ લક્ષ્યતે ।
કુટ્ટનં દન્તસંઘર્ષઃ સંસ્ફોટઃ ખણ્ડનં મુહુઃ ॥ ૧૪૯ ॥

છિન્નં તુ ગાઢસંશ્લેષશ્ચુક્કિતં દૂરવિચ્યુતિઃ ।
લેહનં જિહ્વયા લેહઃ કિઞ્ચિત્ શ્લેષઃ સમં ભવેત્ ॥ ૧૫૦ ॥

દન્તૈર્દષ્ટેઽધરે દષ્ટમિત્યેષાં વિનિયોજનમ્ ।
ભયશીતજ્વરક્રોધગ્રસ્તાનાં કુટ્ટનં ભવેત્ ॥ ૧૫૧ ॥ જપાધ્યયનસંલાપભક્ષ્યયોગે ચ ખણ્ડનમ્ ।
છિન્નં વ્યાધૌ ભયે શીતે વ્યાયામે રુદિતે મૃતે ॥ ૧૫૨ ॥

જૃમ્ભણે ચુક્કિતં કાર્યં તથા લેહ્યે ચ લેહનમ્ ।
સમં સ્વભાવભાવેષુ સન્દષ્ટં ક્રોધકર્મસુ ॥ ૧૫૩ ॥

ઇતિ દન્તોષ્ઠજિહ્વાનાં કરણાચ્ચિબુકક્રિયા ।
વિધુતં વિનિવૃત્તં ચ નિર્ભુગ્નં ભુગ્નમેવ ચ ॥ ૧૫૪ ॥

વિવૃતં ચ તથોદ્વાહિ કર્માણ્યત્રાસ્યજાનિ તુ ।
વ્યાવૃત્તં વિનિવૃત્તં સ્યાદ્વિધુતં તિર્યગાયતમ્ ॥ ૧૫૫ ॥

અવાઙ્મુખત્વં નિર્ભુગ્નં વ્યાભુગ્નં કિઞ્ચિદાયતમ્ ।
વિશ્લિષ્ટોષ્ઠં ચ વિવૃતમુદ્વાહ્યુત્ક્ષિપ્તમેવ ચ ॥ ૧૫૬ ॥

વિનિવૃત્તમસૂયાયામીર્ષ્યાક્રોધકૃતેન ચ ।
અવજ્ઞાવિવૃતાદૌ ચ સ્ત્રીણા કાર્યા પ્રયોક્તૃભિઃ ॥ ૧૫૭ ॥

વિધુતં વારણે ચૈવ નૈવમિત્યેવમાદિષુ ।
નિર્ભુગ્નં ચાપિ વિજ્ઞેયં ગમ્ભીરાલોકનાદિષુ ॥ ૧૫૮ ॥

ભુગ્નં લજાન્વિતે યોજ્યં યતીનાં તુ સ્વભાવજમ્ ।

નિર્વેદૌત્સુક્યચિન્તાસુ નયે ચ વિનિમન્ત્રણે ॥ ૧૫૯ ॥

વિવૃત્તં ચાપિ વિજ્ઞેયં હાસ્યશોકભયાદિષુ ।
સ્ત્રીણામુદ્ગ્રાહિ લીલાયાં ગર્વે ગચ્છત્યનાદરે ॥ ૧૬૦ ॥

એવ નામેતિ કાર્યં ચ કોપવાક્યે વિચક્ષણૈઃ ।
સમં સાચ્યનુવૃત્તાદિ યચ્ચ દૃષ્ટિવિકલ્પિતમ્ ॥ ૧૬૧ ॥

તજ્જ્ઞૈસ્તેનાનુસારેણ કાર્યં તદનુગં મુખમ્ ।
અથાતો મુખરાગસ્તુ ચતુર્ધા પરિકીર્તિતઃ ॥ ૧૬૨ ॥

સ્વાભાવિકઃ પ્રસન્નશ્ચ રક્તઃ શ્યામોઽર્થસંશ્રયઃ ।
સ્વાભાવિકસ્તુ કર્તવ્યઃ સ્વભાવાભિનયાશ્રયઃ ॥ ૧૬૩ ॥

મધ્યસ્થાદિષુ ભાવેષુ મુખરાગઃ પ્રયોક્તૃભિઃ ।
પ્રસન્નસ્ત્વદ્ભુતે કાર્યો હાસ્યશૃઙ્ગારયોસ્તથા ॥ ૧૬૪ ॥

વીરરૌદ્રમદાદ્યેષુ રક્તઃ સ્યાત્ કરુણે તથા ।
ભયાનકે સબીભત્સે શ્યામં સઞ્જાયતે મુખમ્ ॥ ૧૬૫૫ ॥

એવં ભાવરસાર્થેષુ મુખરાગં પ્રયોજયેત્ ।
શાખાઙ્ગોપાઙ્ગસંયુક્તઃ કૃતોઽપ્યભિનયઃ શુભઃ ॥ ૧૬૬ ॥

મુખરાગવિહીનસ્તુ નૈવ શોભાન્વિતો ભવેત્ ।
શરીરાભિનયોઽલ્પોઽપિ મુખરાગસમ્ન્વિતઃ ॥ ૧૬૭ ॥

દ્વિગુણાં લભતે શોભાં રાત્રાવિવ નિશાકરઃ ।
નયનાભિનયોઽપિ સ્યાન્નાનાભાવરસાસ્ફુટઃ ॥ ૧૬૮ ॥

મુખરાગાન્વિતો યસ્માન્નાટ્યમત્ર પ્રતિષ્ઠિતમ્ ।
યથા નેત્રં પ્રસર્પેત મુખભ્રૂદૃષ્ટિસંયુતમ્ ॥ ૧૬૯ ॥

તથા ભાવરસોપેતં મુખરાગં પ્રયોજયેત્ ।
ઇત્યેવં મુખરાગસ્તુ પ્રોક્તો ભાવરસાશ્રયઃ ॥ ૧૭૦ ॥

અતઃ પરં પ્રવક્ષ્યામિ ગ્રીવાકર્માણિ વૈ દ્વિજાઃ ! ।
સમા નતોન્નતા ત્ર્યસ્રા રેચિતા કુઞ્ચિતાઞ્ચિતા ॥ ૧૭૧ ॥

વલિતા ચ નિવૃત્તા ચ ગ્રીવા નવવિધાર્થતઃ ।
સમા સ્વાભાવિકી ધ્યાનસ્વભાજપકર્મસુ ॥ ૧૭૨ ॥

નતા નતાસ્યાલઙ્કારબન્ધે કણ્ઠાવલમ્બને ,
ઉન્નતાભ્યુન્નતમુખી  ગ્રીવા ચોર્ધ્વનિવેશને ॥ ૧૭૩॥

ત્ર્યસ્રા પાર્શ્વગતા જ્ઞેયા સ્કન્ધભારેઽતિ દુઃખિતે ।
રેચિતા વિધુતભ્રાન્તા હાવે મથનૃત્તયોઃ ॥ ૧૭૪॥

કુઞ્ચિતાકુઞ્ચિતે મૂર્ધ્નિ ધારિતે ગલરક્ષણે ।
અઞ્ચિતાપસૃતોદ્બન્ધકેશકર્ષોર્ધ્વદર્શને ॥ ૧૭૫॥

પાર્શ્વોન્મુખી સ્યાદ્વલિતા ગ્રીવાભેદૈશ્ચ વીક્ષણે ।
નિવૃતાભિમુખીભૂતા સ્વસ્થાનાભિમુખાદિષુ ॥ ૧૭૬॥

ઇત્યાદિ લોકભાવાર્થા ગ્રીવાભઙ્ગૈરનેકધા ।
ગ્રીવાકર્માણિ સર્વાણિ શિરઃ કર્માનુગાનિ હિ ॥૧૭૭॥

શિરસઃ કર્મણઃ કર્મ ગ્રીવાયાઃ સમ્પ્રવર્તતે ।
ઇત્યેતલ્લક્ષણં પ્રોક્તં શીર્ષોપાઙ્ગસમાશ્રયમ્ ।
અઙ્ગકર્માણિ શેષાણિ ગદતો મે નિબોધત  ॥ ૧૭૯॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે ઉપાઙ્ગવિધાનં નામ અષ્ટમોઽધ્યાયઃ ।

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

---

*Natya Shastra Chapter 8*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*